प्रीणयिष्यन्-पिप्रीणयिषिष्यन्-न्ती-ती, प्रेष्यन्-न्ती-ती, पिप्रीषिष्यन्-न्ती-ती ;
मित्रप्रीः-मित्रप्रियौ-मित्रप्रियः ; —

प्रीणितम्-तः, पिप्रीणयिषितः-तवान्, प्रीतम्-तः, पिप्रीषितः, पेप्रीयितः-तवान् ;
प्रीणः, पिप्रीणयिषुः, प्रियः, पिप्रीषुः, प्रेप्रियः ;
प्रीणयितव्यम्, पिप्रीणयिषितव्यम्, प्रेतव्यम्, पिप्रीषितव्यम्, प्रेप्रीयितव्यम् ;
प्रीणनीयम्, पिप्रीणयिषणीयम्, प्रयणीयम्, पिप्रीषणीयम्, पेप्रीयणीयम् ;
प्रीण्यम्, पिप्रीणयिष्यम्, प्रेयम्, पिप्रीष्यम्, पेप्रीय्यम् ;
ईषत्प्रीणः-दुष्प्रीणः-सुप्रीणः, ईषत्प्रयः-दुष्प्रयः-सुप्रयः ; — —
प्रीण्यमानः, पिप्रीणयिष्यमाणः, प्रीयमाणः, पिप्रीष्यमाणः, पेप्रीय्यमाणः ;
प्रीणः, पिप्रीणयिषः, [1]प्रयः, पिप्रीषः, पेप्रीयः ;
प्रीणयितुम्, पिप्रीणयिषितुम्, प्रेतुम्, पिप्रीषितुम्, पेप्रीयितुम् ;
प्रीणना, पिप्रीणयिषा, प्रीतिः, पिप्रीषा, पेप्रीया ;
प्रीणनम्, पिप्रीणयिषणम्, प्रयणम्, पिप्रीषणम्, पेप्रीयणम् ;
प्रीणयित्वा, पिप्रीणयिषित्वा, प्रीत्वा, पिप्रीषित्वा, पेप्रीयित्वा ;
विप्रीण्य, विपिप्रीणयिष्य, विप्रीय, विपिप्रीष्य, विपेप्रीय्य ;
प्रीणम् २, प्रीणयित्वा २, } पिप्रीणयिषम् २, पिप्रीणयिषित्वा २, } प्रायम् २, प्रीत्वा २, } पिप्रीषम् २, पिप्रीषित्वा २, } पेप्रीयम् २ ; पेप्रीयित्वा २. }

(1074) " प्रुङ् गतौ " (I-भ्वादिः-957. सक. अनि. आत्म.)

प्रावकः-विका, प्रावकः-विका, पुप्रूषकः-षिका, पोप्रूयकः-यिका, [2]पिप्रावयिषकः-पुप्रावयिषकः-षिका ;
प्रोता-त्री, प्रावयिता-त्री, पुप्रूषिता-त्री, पोप्रूयिता-त्री, पिप्रावयिषिता-पुप्रावयिषिता-त्री, इत्यादीनि सर्वाण्यपि रूपाणि च्यवतिवत् (558) ज्ञेयानि ।

1. 'एरच्' (3-3-56) इति भावे घञपवादोऽप्प्रत्ययः । 'एरजण्यन्तानाम्' इति मतं तु भाष्यासम्मतत्वादप्रामाणिकम् । स्पष्टमिदं कैयटे (3-2-1) ।
2. 'स्रवतिशृणोतिद्रवतिप्रवति—' (7-4-81) इत्यनेन ण्यन्तात् सनि अवर्णपरे यणि च उवर्णान्तस्याभ्यासस्येकारादेशो वा भवति । इयमप्राप्तविभाषा । एवं ण्यन्तात् सनि सर्वत्र रूपद्वयं ज्ञेयम् ।